# Shri Mrityunjaya Stotram

# શ્રીમૃત્યુઞ્જયસ્તોત્રમ્

## Document Information

Text title : Shri Mrityunjaya Stotram

File name : mRRityunjayastotram5.itx

Category : shiva

Location : doc_shiva

Proofread by : PSA Easwaran

Latest update : April 25, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# શ્રીમૃત્યુઞ્જયસ્તોત્રમ્

શમ્ભો મહાદેવ શમ્ભો મહાદેવ શમ્ભો મહાદેવ ગઙ્ગાધર ।
મૃત્યુઞ્જય પાહિ મૃત્યુઞ્જય પાહિ મૃત્યુઞ્જય પાહિ મૃત્યુઞ્જય ॥ ધૃ॥

અદ્રીશજાધીશ વિદ્રાવિતાઘૌઘ ભદ્રાકૃતે પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

આકાશકેશામરાધીશવન્દ્ય ત્રિલોકેશ્વર પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ઇન્દૂપલેન્દુપ્રભોત્ફુલ્લકુન્દારવિન્દાકૃતે પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ઈશાર્ચિતાઙ્ઘ્રે મહેશાખિલાવાસ કાશીપતે પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ઉક્ષેશસઞ્ચાર યક્ષેશસન્મિત્ર દક્ષાર્ચિત પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ઊહાપથાતીતમાહાત્મ્યસંયુક્ત મોહાન્તક પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ઋદ્ધિપ્રદાશેષ બુદ્ધિપ્રતારજ્ઞ સિદ્ધેશ્વર પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ૠપર્વતોત્તુઙ્ગશૃઙ્ગાગ્રસઙ્ગાઙ્ગહેતો સદા પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

લબ્ધાત્મભક્તૌઘસઙ્ઘાતિ સઙ્ઘાતકારિપ્રહન્ પાહિ પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

લૂતીકૃતાનેકપારાદિકૃત્યન્તનીયાધુના પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

એકાદશાકારરાકેન્દુસઙ્કાશ શોકાન્તક પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ઐશ્વર્યધામાર્ક વૈશ્વાનરાભાસ વિશ્વાધિક પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ઓષધ્યધીશાંશુભૂષાદિપાપૌઘમોક્ષપ્રદ પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ઔદ્ધત્યહીનપ્રબુદ્ધપ્રભાવ પ્રબુદ્ધાખિલ પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

અમ્બાસમાશ્લિષ્ટ લમ્બોદરાપત્ય બિમ્બાધર પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

અસ્તોકકારુણ્ય દુસ્તારસંસારનિસ્તારણ પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

કર્પૂરગૌરોગ્ર સર્પાઢ્ય કન્દર્પદર્પાપહ પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ખદ્યોતનેત્રાગ્નિવિદ્યુદ્ગ્રહાક્ષાદિ વિદ્યોદિત પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ગન્ધેભચર્માઙ્ગસક્તાઙ્ગ સંસારસિન્ધુપ્લવ પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ઘર્માંશુસઙ્કાશ ધર્મૈકસંપ્રાપ્ય શર્મપ્રદ પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ઙોત્પત્તિબીજાખિલોત્પત્તિબીજામરાધીશ માં પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ચન્દ્રાર્ધચૂડ મરુન્નેત્ર કાઞ્ચીનગેન્દ્રાલય પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

છન્દશ્શિરોરત્ન સન્દોહસંવેદ્ય મન્દસ્મિત પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

જન્મક્ષયાતીત ચિન્માત્રમૂર્તે ભવોન્મૂલન પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ઝણઞ્ચારુઘણ્ટામણિવ્રાતકાઞ્ચીગુણશ્રેણિક પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ઞણિત્યષ્ટચિન્તાન્તરઙ્ગ પ્રમોદાટનાનન્દહૃત્પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ટઙ્કાતિટઙ્ક મરુન્નેત્ર ભૃઙ્ગાઙ્ગનાસઙ્ગત પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ઠાલી મહાપાં કેલી તિરસ્કારકારાનલ પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ડોલાયમાનાન્તરઙ્ગીકૃતાનેકલાસ્યેશ માં પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ઢક્કાધ્વનિધ્વાનદાહધ્વનિભ્રાન્તશતૃત્વ માં પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ણાકારનેત્રાન્ત સન્તોષિતાત્મશ્રિતાનન્દ માં પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

તાપત્રયાત્યુગ્રદાવાનલસાક્ષિરૂપાવ્યય પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

સ્થાણો મુરારાતિબાણોલ્લસત્પઞ્ચબાણાન્તક પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

દીનાવનાદ્યન્તહીનાગમાન્તૈક માનોદિત પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ધાત્રીધરાધીશપુત્રીપરિષ્વઙ્ગચિત્રાકૃતે પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

નન્દીશવાહારવિન્દાસનારાધ્ય વિન્દાકૃતે પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

પાપાન્ધકારપ્રદીપાદ્વયાનન્દરૂપ પ્રભો પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ફાલામ્બકાનન્ત નીલોજ્જ્વલન્નેત્ર શૂલાયુધ પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

બાલાર્કબિમ્બાંશુભાસ્વજ્જટાજૂટિકાલઙ્કૃત પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ભોગીશ્વરાકલ્પ યોગિપ્રિયાભીષ્ટભોગપ્રદ પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

મૌલીદ્યુનદ્યૂર્મિમાલાજટાજૂટિકાપ્રિય પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

યજ્ઞેશ્વરાખણ્ડતદ્યજ્ઞાનિધે દક્ષયજ્ઞાન્તક પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

રાકેન્દુકોટિપ્રતીકાશલોકાદિ સૃઙ્વન્દિત પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

લઙ્કેશવન્દ્યાઙ્ઘ્રિપઙ્કેરુહાશેષ શઙ્કાસહ પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

વાગીશતૂણીરવન્દારુમન્દાર શૌરિપ્રિય પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

શર્વાખિલાધાર સર્વેશ ગીર્વાણગર્વાપહ પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ષડ્વક્ત્રતાત ત્રિષાડ્ગુણ્યલોકાદિ સૃઙ્વન્દિત પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

સોમાવતંસાન્તરઙ્ગે સ્વયાન્ધામ સામપ્રિય પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

હેલાનિગીર્ણોગ્ર હાલાહલાસહ્ય કાલાન્તક પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ક્ષોણીધરાધીશ બાણાસનાવાપ્તશોણાકૃતે પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

ક્ષિત્યમ્બુતેજોમરુદ્વ્યોમસોમાત્મસત્યાકૃતે પાહિ મૃત્યુઞ્જય ॥ મૃત્યુઞ્જય ॥

શમ્ભોમહાદેવ શમ્ભોમહાદેવ શમ્ભોમહાદેવ ગઙ્ગાધર ॥ મૃત્યુઞ્જય ॥

મૃત્યુઞ્જય પાહિ, મૃત્યુઞ્જય પાહિ ।
મૃત્યુઞ્જય પાહિ, મૃત્યુઞ્જય પાહિ ।
મૃત્યુઞ્જયો મુક્તિદાતા અથ્યવોચદિતિ શ્રુતૌ ॥ મૃત્યુઞ્જય ॥

ભવરોગ નિમગ્નાનાં ભિષઙ્મણિરિતીરિતઃ ॥ મૃત્યુઞ્જય ॥

ઇતિ મૃત્યુઞ્જયસ્તોત્રં સમાપ્તમ્ ।

Proofread by PSA Easwaran

*Shri Mrityunjaya Stotram*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*